युधिष्ठिर इति ख्यातः पाण्डोः प्रथमजः सुतः ॥” अथ गच्छति काले धृतराष्ट्रेण यौवराज्ये स्थापितोऽयं दयादाक्षिण्यादिगुणपरम्परया प्रजासु लब्धकीर्त्तिरनुजैः सह सुखमुवास। अथ जतुगृहदाहानन्तरं त्यक्तराज्यो द्रुपदराज्यमभिगम्य द्रौपदीं सानुजः परिणीय पुनः स्वराज्यमागतवान्। ततः कृष्णसहायो राजसूययज्ञकरणाय दुर्ज्जयान् जरासन्धप्रभृतिनृपतीन् हत्वा राजसूयेष्टिं समापयामास। ततोऽसूयापरवशदुर्य्योधनमतानुसारिणा कैतवपटुना शकुनिना सह द्यूतं कृत्वा पराजितोऽनुजैर्भीमादिभिः पत्न्या द्रौपद्या च सहितो द्वादशवर्षं वनवासाय एकवर्षमज्ञातवासाय च प्रस्थितो द्वैतवनमध्युवास। ततो द्वादशवर्षैर्वनवासजातं महत् कष्टमनुभूय अज्ञातवासार्थं त्रयोदशवर्षे विराटनगरमधिवसन् पुनः कृष्णसहायः स्वराज्यप्राप्त्यर्थं महतीं चेष्टां कृतवान्। कृतेऽपि यत्ने यदा विशुणगृहो दुर्य्योधनो राज्यादिकं न दत्तवान् तदा लब्धसैन्यबलोऽसौ कुरुक्षेत्रे महत् युद्धं कृत्वा विनाश्य च दुर्य्योधनादीन् हस्तिनाधिपतिः सम्राट् बभूव। अथाश्वमेधादिना सुरगणान् परितोष्य षट्त्रिंशद्वर्षं राज्यसुखमनुभूतवान्। ततः प्रभासे विप्रशापात् यदुवंशक्षयमाकर्ण्यातिनिर्व्विसः षट्त्रिंशवर्षवयस्कं अर्ज्जुनपौत्रं परीक्षितं स्वराज्येऽभिषिच्य उत्तरामार्गेण स्वर्गारोहणं कृतवानिति। तथाच देवीभागवते। २। ८। १५-१७।

“देहत्यागं हरेः श्रुत्वा यादवानां क्षयं तथा।
गमनाय मतिं चक्रे राजा हैमाचलं प्रति ॥
षट्त्रिंशद्वार्षिकं राज्ये स्थापयित्वोत्तरासुतम्।
निर्जगाम वनं राजा द्रौपद्या भ्रातृभिः सह ॥
षट्त्रिंशच्चैव वर्षाणि कृत्वा राज्यं गजाह्वये।
गत्वा हिमाचले षट् ते जहुः प्राणान्
पृथासुताः ॥”

अस्यान्यद्विशेषविवरणन्तु महाभारतादौ विस्तरशो द्रष्टव्यम् ॥ )

युधीयः, त्रि, योद्धा। युधधातोरीयप्रत्ययेन निष्पन्नः ॥

युध्मः, पुं, ( युध्यते इति युध्यते येनेति वा। युध् + “इषियुधीन्धिदसिश्याधूसूभ्यो मक्।” उणा० १।१४४। इति मक्। संग्रामः। धनुः। इति मेदिनी ॥ वाणः। इत्युणादिकोषः ॥ योद्धा। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (यथा, ऋग्वेदे। १। ५५। ५।

“स इन्महानि समिथानि मज्मना
कृणोति युध्म ओजसा जनेभ्यः ॥”

“युध्मः योद्धा।” इति तद्भाष्ये सायणः ॥ ) शेषसंग्रामः। शरभः। इति संक्षिप्तसारोणादिवृत्तिः ॥

युप, य इर् विमोहे। इति कविकल्पद्रुमः ॥ ( दिवा०-पर०-सक०-सेट्। ) विमोह आकुलीकरणम्। य, युप्यति। इर्, अयुपत् अयोपीत्। पुषादित्वात् ङ इत्यन्ये। इति दुर्गादासः ॥

युयुक्खुरः, पुं, (युर्निन्दितः युक् योजनास्य। तादृशः खुरो यस्य।) क्षुद्रव्याघ्रः। इति शब्दचन्द्रिका ॥

युयुधानः, पुं, ( युध्यतेऽसौ। युध + “सुक्षियुधिभ्यां सन्वच्च।” उणा० २। ९१। इत्यानच् कित्कार्य्यं सन्वत्कार्य्यञ्च। ) सात्यकिः। यथा,—

“शैनेयस्तु शिनेर्नप्ता युयुधानश्च सात्यकिः ॥”
इति त्रिकाण्डशेषः ॥

इन्द्रः। क्षत्त्रियः। इति संक्षिप्तसारोणादिवृत्तिः ॥ त्रि, योद्धा च ॥

युवकः, पुं, युवा। युवन्शब्दात् कन्प्रत्ययेन निष्पन्नः ॥

युवगण्डः, पुं, (यूनां गण्ड आश्रयत्वेनास्त्यस्य। युवगण्ड + अर्श आद्यच्।) यूनो गण्डस्थव्रणविशेषः। वयस्फोड़ा इति भाषा। यथा,—

“युवगण्डो यवगण्डः स्यात् वयस्फोटाह्वये द्वयम् ॥”
इति शब्दरत्नावली ॥

युवजानिः, पुं, ( युवतिर्जाया यस्येति। “जायाया निङ्।” ५।४।१३४। इति निङ्।)युवतीपतिः।यथा,

“युवजानिर्धनुष्पाणिर्भूमिष्ठः खविचारिणः।
रामो यज्ञद्रुहो हन्ति कालकल्पशिलीमुखः ॥”
इति भट्टिः। ५। १३ ॥

युवतिः, स्त्रि, ( युवन् + “यूनस्तिः।” ४। १। ७७। इति तिः। ) प्राप्तयौवना ॥ ( यथा, अभिज्ञानशाकुन्तले ४ अङ्के।

“शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥”)

युवती, स्त्री, ( यु + शतृ + ङीप्। इति सिद्धान्तकौमुदी। ४। १। ७७। कृदिति ङीष्। इत्युज्ज्वलदत्तः। १। १५६। ) प्राप्तयौवना। यथा, बृहत्संहितायाम्। ७५। ४।

“यो यं विचिन्तयति याति स तन्मयत्वं
यस्मादतः सुभगयेव गता युवत्यः ॥”)

तत्पर्य्यायः। युवतिः २ यूनी ३ तरुणी ४ तलुनी ५ दिक्करी ६ धनिका ७ धनीका ८ मध्यमा ९ दृष्टरजाः १० मध्यमिका ११। इति शब्दरत्नावली ॥ ईश्वरी १२ वर्य्या १३। इति हेमचन्द्रः। ३। ५११ ॥ वयस्था १४। इति राजनिर्घण्टः ॥ तस्या लक्षणादि यथा,—

“आषोड़शाद्भवेद्बाला तरुणी त्रिंशता मता।
पञ्चपञ्चाशतः प्रौढ़ा वृद्धा भवति तत्परम् ॥”
इति कालिदासः ॥

“बाला तु प्राणदा प्रोक्ता युवती प्राणहारिणी।
प्रौढ़ा करोति वृद्धत्वं वृद्धा मरणमादिशेत् ॥
निदाघशरदोर्ब्बाला प्रौढ़ा वर्षावसन्तयोः।
हेमन्ते शिशिरे योग्या न वृद्धा कापि शस्यते ॥”

योग्या युवती। इति राजवल्लभः ॥ स्त्रीसामान्यम्। यथा। प्रमदा चेति विज्ञेया युवतिश्च तथा स्मृतेति भागुरिः। प्राप्तयौवना युवतिरिति वात्स्यायनः। इत्यमरटीकायां भरतः। २। ६। ८ ॥*॥ हरिद्रा। इति शब्दचन्द्रिका ॥

युवतीष्टा, स्त्री, (युवतीनामिष्टा।) स्वर्णयूथिका। इति राजनिर्घण्टः ॥

युवनाश्वः, पुं, सूर्य्यवंशीयराजविशेषः। स च गौरीगर्भे प्रसेनजितो जातः मान्धातृपिता च। यथा,—

“तस्याः प्रसेनजिज्जज्ञे लेभे भार्य्या पतिव्रता।
गौरी नामाभिशप्ता सा नदीभूता तरङ्गिणी।
तस्यां प्रसेनजिज्जज्ञे युवनाश्वं महीपतिम् ॥
यावत् सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति।
सर्व्वं तद्यौवनाश्वस्य मान्धातुः क्षेत्रमुच्यते ॥”
इति वह्निपुराणे सगरोपाख्यानाध्यायः ॥

युवनाश्वजः, पुं, (युवनाश्वात् जातः। जन् + डः।) मान्धातृराजः। इति हेमचन्द्रः। ३। ३६४।

युवराजः, पुं, भाविबुद्धविशेषः। तत्पर्य्यायः। मैत्रेयः २ अजितः ३। इति त्रिकाण्डशेषः ॥ राजपुत्त्रः। तत्पर्य्यायः। कुमारः २ भर्त्तृदारकः ३। इत्यमरः। १। ७। १२ ॥ युवा बालो राजा यूनां वा राजा युवराजः। सख्युरोरात्र इति षः। कुमारयति कुमारः। स्यात् कुमार कुमाल तु क केलौ अन्। भर्त्तुर्दारकः पुत्त्रः भर्त्ता चासौ दारकश्चेति वा भर्त्तृदारकः। दारको भेदके शिशाविति निगमः। इति भरतः ॥ ( यथा, महाभारते। १। ७३। १६।

“मयि जायेत यः पुत्त्रः स भवेत्त्वदनन्तरम्।
युवराजो महाराज! सत्यमेतद्ब्रवीमि ते ॥”)

युवा, [ न् ] त्रि, ( यौतीति। यु + “कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः।” उणा० १। १५६। इति कनिन्। ) तरुणः। ( यथा, मनौ। २। १२०।

“ऊर्द्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर
आयति।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान् प्रतिपद्यते ॥”)

श्रेष्ठः। निसर्गबलशाली। इति मेदिनी। ने, ११३ ॥

युवा, [ न् ] पुं, ( यौतीति। यु + कनिन्। ) यौवनावस्थाविशिष्टः। षोड़शवर्षात् त्रिंशद्वर्षपर्य्यन्तवयस्कः। इति केचित् ॥ षोड़शवर्षात् सप्ततिवर्षपर्य्यन्तवयस्कः। यथा,—

“आषोड़शाद्भवेद्बालस्तरुणस्तत उच्यते।
वृद्धः स्यात् सप्ततेरूर्द्ध्वं वर्षीयान् नवतेः परम् ॥”
इति भरतधृतस्मृतिः ॥

(“आषोड़शाद्भवेद्बालः पञ्चत्रिंशत् युवा नरः।”
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये ॥)

तत्पर्य्यायः। वयस्थः २ तरुणः ३। इत्यमरः। २।६।४२ ॥ वयःस्थः ४ तलुनः ५। इति शब्दरत्नावली ॥ गर्भरूपः ६ वेटकः ७। इति जटाधरः ॥

युष, भजने। इति कविकल्पद्रुमः ॥ सौत्रधातुरयम्। ( पर०-सक०-सेट्। ) योषित् युष्मद्। इति दुर्गादासः ॥

युष्मद्, ( योषति भजतीति। युष् + “युष्यसिभ्यां मदिक्।” उणा० १। १३८। इति मदिक्। )